# राष्ट्रियसंस्कृतविद्यापीठम् , तिरुपतिः

(मानितविश्वविद्यालयः)

राष्ट्रियमूल्याङ्कनप्रत्यायनपरिषदा चतुरङ्कमापन्यां ३.७१ सञ्चितश्रेण्यङ्कमध्यमानेन

“ए” श्रेण्या प्रत्यायितं (द्वितीयचक्रम्)

## संस्कृतविकासकेन्द्रम्

# वार्षिकप्रतिवेदनम्

2018 - 19



अध्यक्षः

आचार्य वि.मुरलीधरशर्मा



संयोजकः

आचार्य प्रह्लाद् रा.जोशी

सदस्याः

   

 

# संस्कृतविकासकेन्द्रम्

एकस्य संस्कृतविश्वविद्यालयस्य उत्तरदायित्वं केवलं शास्त्राणां संरक्षणम् एव न अपि तु सामाजिक उत्तरदायित्वमपि भवति। शास्त्राणां रक्षणेन सह संस्कृतभाषायाः प्रसारप्रचारम् अपि कुर्यात्। अतः तादृशं किञ्चित् केन्द्रम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव "संस्कृतविकासकेन्द्रम्" ।

राष्ट्रियसंस्कृतविद्यापीठस्य कुलपतयः आचार्या वि.मुरलीधरशर्मवर्याः संस्कृतविकासकेन्द्रस्य समुद्घाटनम् अकार्षुः । अस्मात् केन्द्रात् नागरेभ्यः बालेभ्यः सर्वेभ्यः संस्कृतभाषायाः एवम् अस्माकं संस्कृतिसम्बद्धान् विचारान् पाठ्यते ।

## संस्कृतविकासकेन्द्रस्य प्रधानकार्याणि एवं सन्ति -

- बालकेन्द्राणामयोजनम्।

- सम्भाषणशिबिराणामयोजनम्।
- गीताजयन्त्यादिपर्वणां निर्वहणम्।
- नुतनतया प्रविष्टानां भाषादक्षतायाः विकासः।
- अनुवर्तिकक्ष्यायाः निर्वहणम्।
- विशेषोपन्यासाः।

# अभिमन्युबालकेन्द्रम्

अद्यतनाः बालाः विद्यालयेषु यद्यपि भाषाः पठन्ति, तथापि भाषासम्बद्धान् सांस्कृतिकान् विषयान्, देशभक्तानां जीवचरित्राणि वा ज्ञातुम् अवसरं न प्राप्नुवन्ति। यतः विद्यालयस्य पाठ्यांशाः एव अधिकाः भवन्ति। अद्यतने विद्यालयशिक्षणे गृहपाठलेखनस्य अनुचितम् अतिप्राधान्यम् आगतमस्ति। एतावद्गृहपाठलेखनं बालानां सर्जनशीलतां सङ्कुचितां करोति, मनोविकासं अवरोधयति च। अत एव अद्यतनाः बालाः गृहपाठ-लेखनरहितानि विरामदिनानि सर्वदा निरीक्षमाणाः भवन्ति।

अतः तादृशं किञ्चित् केन्द्रम् आवश्यकं यत्र भारतीयसंस्कृतिसम्बद्धान् विचारान् पाठयितुं व्यवस्था स्यात्, देशभक्तानां जीवनचरित्राणि श्रोतुम् अवसरः च स्यात्, यत्र च अनौपचारिकं शिक्षणं स्यात् यत्र च परीक्षायाः गृहपाठस्य वा भारः बालानां मनसि भयं न जनयेत्, यत्र च बालाः मातुः उत्सङ्ग इव उत्साहेन हसन्तः क्रीडन्तः एव अस्माकं संस्कृतिसम्बद्धान् विचारान् जानीयुः इत्येतस्याः कल्पनायाः मूर्तः आकारः एव "बालकेन्द्रं" नाम।

संस्कृतस्य जनप्रियतासम्पादने सम्भाषणशिबिरम् इव अपरम् अत्यन्तं प्रभावि साधनं भवितुम् अर्हति बालकेन्द्रम्। यतः भारतीयसंस्कृतिसम्बद्धेषु विचारेषु बहवः संस्कृतस्तोत्ररुपेण सन्ति। तेषां पाठनेन बालाः सहजतया संस्कृतिविषये आसक्ताः भवन्ति। प्रथमे वयसि बालानां ग्रहणशक्तिः अधिका। अतः ते अल्पेन एव प्रयत्नेन बहून् अंशान् ग्रहीतुं शक्नुवन्ति। अन्यच्च संस्कृतशब्दाः मातृभाषायामपि भवन्ति इत्यतः संस्कृतभाषा तेषां कष्टाय न भवति। एतेन कारणेन तेषाम् उच्चारणमपि शुद्धं भवति। बालकेन्द्रे ये संस्कृतं जानन्ति ते बालकाः सहजतया स्वगृहे अपि संस्कृतभाषायाः प्रयोगं कुर्वन्ति एव। एवं **संस्कृतप्रचारार्थम् एकम् उत्तमं साधनं संस्कृतबालकेन्द्रम्।**

अद्यतने आधुनिकयुगे संस्कृतिः क्षीयमाणा वर्तते। तस्याः पुनरुज्जीवनाय समर्थाः अद्यतनाः बालाः एव । अद्यतनबालाः एव नवभारतस्य निर्मातारः इति मन्वानः विद्यपीठस्य कुलपतिः **आचार्यः वि.मुरलीधरशर्मवर्यः अभिमन्युबालकेन्द्रस्य** आरम्भम् अकरोत् । बालेभ्य जीवनस्य मूल्यं, भारतस्य संस्कृतेः विषये परिकल्पनाय एनं सङ्कल्पम् अकरोत् । 2018 **शैक्षिकवर्षारम्भे** विद्यापीठे एवं तिरुपतौ 37 **बालकेन्द्राणाम्** आरम्भम् एतस्य मार्गदर्शनेन समभूत् । **विद्यापीठस्य अभिमन्युबालकेन्द्रे शताधिकच्छात्राः**(100) सन्ति इति आनन्दकरः विषयः। एतेभ्यः प्रतिशनिभानुवासरं सायं 5.30 वादनतः 7.00 वादनपर्यन्तं कक्ष्याः भवन्ति। कक्ष्यायां श्लोकान्-गीतानि-नृत्यम्-वासरतिथीनां नामानि, संवत्सराणां, ऋतुनां नामानि, सामान्यसंस्कृतसम्भाषणम् एवं कथाः चित्रमाध्यमेन पाठ्यन्ते ।

अस्मिन् अभिमुन्यबालकेन्द्रे 1009 छात्राः सन्ति इति आनन्दकरः विषयः। विभिन्नानां जातीनां जनाः अत्र पठन्ति। भाषाध्ययनसमये जातिभेदः न भवति। एवमेव विभिन्नेषु विद्यालयेषु बालकेन्द्राणि विद्यापीठपक्षतः प्राचालयन् ।

- तिरुपतिनगरे चाल्यमानानां बालकेन्द्राणां संख्या – 37
- बालकेन्द्रच्छात्राणां संख्या – 1009
- चाल्यमानानां बालकेन्द्राणां स्थानानि –

1. राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः(3)।
2. श्रीविद्या वण्डरकिड्सविद्यालयः(9)।
3. कुमारविद्यालयः तिरुपतिः(3)।
4. कपिलतीर्थनगरं तिरुपतिः(1)।
5. ओयासिस् विद्यालयः(2)।
6. बालमन्दिरम्, तिरुपतिः(4)।
7. Cambridge विद्यालयः (2) ।
8. भुवनेश्वरीविद्यालयः तिरुचानूरुनगरम् (4)।
9. सान्दीपनिविद्यालयः तिरुपतिः(6)।
10. भक्तिवेदान्तविद्यालयः (ISKCON) तिरुपतिः(3)।

# संस्कृतसम्भाषणशिबिरम्

या कापि भाषा दशसु दिनेषु पाठयितुम् एवं भाषितुं न शक्यते । किन्तु संस्कृतभाषा तादृशी सरला विद्यते ।तां भाषां दशसु दिनेषु भाषितुं शक्यते । तदर्थम् एव संस्कृतसम्भाषणशिबिरम् चाल्यते । एतस्य पाठ्यक्रमः तथा निर्मितः वर्तते , यथा वयं सरलया रीत्या दशसु दिनेषु भाषितुं शक्नुमः। संस्कृतस्य जनप्रियतासम्पादने सम्भाषणशिबिरम् अपरम् अत्यन्तं प्रभाविसाधनम् । एतद् सर्वं मनसि निधाय विद्यपीठस्य कुलपतिः आचार्य वि.मुरलीधरशर्मवर्यः संस्कृतसम्भाषणशिबिरस्य आरम्भम् अकरोत् ।

कुलपतेः सङ्कल्पानुसारं विद्यापीठे प्रतिमासं संस्कृतसम्भाषणशिबिरं अचालयत् । एतावता विद्यापीठे सामाजिकानां कृते पञ्च (5) शिबिराणि चालितानि। तेषु शिबिरेषु 328 जनाः भागगृहणं कृतवन्तः।

- चालितसंस्कृतसम्भाषणशिबिराणां संख्या – 28
- छात्राणां संख्या – 647
- चालितसंस्कृतसम्भाषणशिबिराणां स्थानानि –

1. भारतीय प्रौद्योगिकी संस्था तिरुपतिः (IIT)।
2. भारतीयविज्ञानशिक्षानुसंधानसंस्था तिरुपतिः (IISER)।
3. राष्ट्रियसंस्कृतविद्यापीठम्, तिरुपतिः।
4. श्री वेङ्कटेश्वर आयुर्वेदकलाशाला तिरुपतिः।
5. श्री वेङ्कटेश्वर प्राच्यपाठशाला तिरुपतिः।
6. श्री पं.ज.ने.मु.उ.पाठशाला तिरुपतिः।

# गीताजयन्त्यादिपर्वाणि

एकस्य विश्वविद्यालयस्य दायित्वं न केवलं शास्त्राणां रक्षणम् एव न, अपि तु समाजः अपि अस्माकं दायित्वमपि भवति । एतत् सर्वं मनसि निधाय अस्माकं विद्यपीठस्य कुलपतिः आचार्य वि.मुरलीधरशर्ममहोदयः समाजाय कार्यद्वयस्य आरम्भम् अकरोत् । समाजिकानां कृते योगशिक्षणम् एवमेव संस्कृतभाषाशिक्षणम्, भारतीयसंस्कृति मानवीयमुल्यानां शिक्षणस्य आरम्भम् अकरोत् ।

विद्यापीठे 24/12/2018 दिनाङ्के भगवद्गीताजयन्तीम् उपलक्ष्य भगवद्गीताजयन्त्युत्सवस्य उद्घाटनमभूत्। अत्र अष्टादशेभ्यः विद्यालयेभ्यः भगवद्गीतायाः

एकैकम् अध्यायं स्पर्धायै दत्तवन्तः। तेषु अध्यायेषु श्लोकानां कण्ठेस्थीकरणस्पर्धाः आयोजिताः। स्पर्धायाम् अष्टादशविद्यालयच्छात्राः भागग्रहणम् अकुर्वन्। सम्पूर्णायां स्पर्धायां 519 छात्राः आसन्। तेषु 65 छात्राः पुरस्कारं प्राप्तवन्तः।

1. Cambridge School.
2. Bhuvaneshwari School.
3. Wonder Kids.
4. Bhartiya Vidya bhavan's Sri Venkateshwara school.
5. S.G. S. High School.
6. S.P. Girls High School.
7. S.V. Oriental High School.
8. Bhakti Vedanta swami mission School (ISKCON).
9. Saandeepani Vidyalaya.
10. K.V 1st Shift and 2nd Shift.
11. S.V. High School.
12. Oasis E.M. School.
13. Little Angels School.
14. SPJNM High School.
15. Gitam School.
16. Kumar School.
17. S.V. Children School.
18. R.S.V.P. Tirupati.

# अभिमन्युबालकेन्द्रवार्ता :



संस्कृतस्य सार्वजनीनभाषात्वेन प्रचाराय प्रसाराय च संस्थापितेन विद्यापीठस्य अभिमन्युबालकेन्द्रेण प्रतिमासं तिरुपतिस्थविविधशिक्षानुष्ठानेषु षट्त्रिंशत् (36) बालकेन्द्राणि समचाल्यन्त । एतेषु केन्द्रेषु प्रायश: 1000 छात्रा: अध्ययनरता: सन्ति । मासस्य अन्तिमेषु दशदिनेषु सरलसंस्कृतसम्भाषणकौशलविकासार्थं विद्यापीठस्य प्रशिक्षिता: छात्रा: अनुभवसम्पन्ना: अध्यापका: तत्र सरलसंस्कृतपाठने भागमगृह्णन् । केन्द्रपक्षत: अक्टोबरमासे भगवद्गीताप्रशिक्षणमपि प्रदत्तमासीत् । प्रतिरविवासरं पत्राचारमाध्यमेन प्रायश: षष्ट्यधिका: नागरिका: बहि:स्था: जनाश्च प्रशिक्षणं प्राप्नुवन्ति । जुलैमासात् नवम्बरमासं यावत् प्रायश: २५ संस्कृतसम्भाषण-शिबिराणि समायोजितानि । केन्द्रस्य सुचारुसञ्चालयनं किरणभट्ट: (शिक्षक:), परमेश्वर: (संयोजक:) इत्यनयो: सहयोगेन क्रियते ।

**उदीरणा उतासीनास्तिष्ठन्त: प्रक्रामन्त । पद्भ्यां दक्षिणसव्याभ्यां मा व्यथिष्महि भूम्याम् । (In daily life, on Earth, Whether we are sitting, standing, or in motion, may our activity be such as would never cause injury or grief.)**